# राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः
## विशिष्टाचार्यप्रवेशपरीक्षा -2020
## प्रश्नपत्रम्

विषयः- साहित्यम् पूर्णाङ्काः-100

1 "वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलुकृती" इति वाक्येन अन्वेषणा-पदस्य प्रयोगः केन विहितः ?

A माघेन B कालिदासेन
C विष्णुशर्मणा D श्रीहर्षेण

2 अनुसन्धानस्य कोऽर्थः ?

A पुनः पुनः निरीक्षणम्
B समस्यायाः कृते निवारणोपायान्वेषणम्
C वैज्ञानिकोपायैः समस्यायाः सत्यासत्यप्रघटनम्
D विषयविस्तारं कृत्वा शोधप्रबन्धलेखनम्

3 अधोलिखितेषु अनुसन्धानस्य प्रथमं सोपानं किम् ?

A समस्यासहायकसामग्रीसङ्कलम्
B समस्यायाः मूल्याङ्कनम्
C समस्यानिर्वाचनम्
D समस्यासमाधानाय प्रयासः

4 अनुसन्धाने प्रतिपादितानि तथ्यानि कीदृशानि स्युः ?

A नमनीयानि B व्यावहारिकाणि
C मौलिकानि D एतत्सर्वम्

5 अधो लिखितेषु किं पदम् "अनुसन्धानम्" इतिपदेन समानार्थकं न भवति ?

A गवेषणम् B शोधसन्दर्भः
C संशोधनम् D परिशोधनम्

6 गुणात्मकानुसन्धाने अधोलिखितेषु किं नोपयुज्यते ?

A आगमनात्मकविश्लेषणम् (Individual Analysis)

B नैसर्गिकाध्ययनम् (Naturalistic Enquiry)

C अन्तर्दृष्टिः (Insight)

D संरचितसाक्षात्कारः (Structured Intervies)

7 "विमर्श" इति शब्दस्य कोऽर्थः ?

A कस्यापि मतस्य व्यङ्ग्यार्थनिर्धारणम्

B कस्यापि मतस्य व्यापकार्थपरिशीलनम्

C कस्यापि मतस्यानुवदनम्

D कस्यापि मतस्य स्वीकारः परिहारो वा

8 "भारतीयग्रन्थसम्पादनशास्त्रप्रवेशिनी" ग्रन्थः तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन कदा प्रकाशितः -

A 2001 B 2002

C 2010 D 2011

9 अधोलिखितेषु चिन्तनशीलप्रश्नः (Reflective Inquiry) कुत्र न प्रचलति ?

A ज्ञानमीमांसायाम् (In epistemology)

B मूल्यमीमांसायाम् (In axiology)

C अध्यात्मशास्त्रे (In metaphysics)

D ऐतिहासिकानुसन्धाने (In historical Research)

10 अधोलिखितेषु किम् ऐतिहासिकानुसन्धानस्य क्षेत्रमुच्यते ?

A अर्थनीतिः B सभ्यता

C अभिलेखः D एतत्सर्वम्

11 आधुनिकोपकरणेषु किं नान्तर्भवति ?

A अन्तर्जालम् B ई - शोधपत्रिका

C ग्रन्थसूची D ई – कोषाः

12 अधोलिखितेषु कानि सामग्रीसङ्कलने प्राथमिकस्रोतांसि भवन्ति ?

A शोधपत्रिकाः B शासकीयानि अभिलेखानि

C साहित्येतिहासः D कोशाः

13 संस्कृतवाङ्मये पुराणानि प्रामुख्येन कीदृशम् अनुसन्धानं सूचयन्ति ?

A ऐतिहासिकम् B दार्शनिकम्

C संख्यात्मकम् D प्रायोगिकम्

14 आगमशास्त्रेषु अनुसन्धानस्य प्रधानं क्षेत्रं किम् ?

A आलयसंस्कृतिः B सौन्दर्यसाधनम्

C आत्मतत्त्वविमर्शः D राजतन्त्रसंस्कृतिः

15 राष्ट्रियपाण्डुलिपि मिषन् इति संस्थायाः ध्येयवाक्यं किम् ?

A या विद्या सा विमुक्तये B तमसो मा ज्योतिर्गमय

C विज्ञानमुपास्व D मातृकां रक्षत

16 "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति अनुसन्धानसूत्रं कुत्र वर्तते ?

A तैत्तिरीयोपनिषदि B कठोपनिषदि

C बृहदारण्यकोपनिषदि D प्रश्नोपनिषदि

17 अनुसन्धानप्रविधेः कृते अपेक्षिताः षोडश पदार्थाः कस्मिन् दर्शने प्राप्यन्ते ?

A वेदान्तदर्शने B सांख्यदर्शने

C न्यायदर्शने D योगदर्शने

18 अनुसन्धानाय अपेक्षितानि प्रमाण-प्रमेय-विमर्श-निर्णय-प्रवृत्त्याख्यानि तत्त्वानि कुत्र वर्णितानि ?

A युक्तिदीपिकायाम् B शृङ्गारप्रकाशे

C रामायणे D श्रीमद्भगवद्गीतायाम्

19 "भारतस्य संस्कृतपत्रिकाः पत्रकाराश्च" इति कीदृशम् अनुसन्धानम्?

A सर्वेक्षणम् B शास्त्रीयम्

C तुलनात्मकम् D क्षेत्रीयम्

20 “विमूढाः नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः” इति कुत्रोक्तम् ?

A रामायणे
B स्कन्दपुराणे
C गीतायाम्
D भागवते

21 ‘सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ’ इत्यत्र कथमलङ्कारता?

A रसस्य च प्राधान्यात्
B दोषाभावात्
C रसस्य अप्राधान्यात्
D गुणाभावात्

22 का ब्रह्मणः निर्मितेः विलक्षणा?

A कविशिक्षा
B विद्या
C कविवाङ्निर्मितिः
D उपासना

23 मम्मटस्य पिता कः ?

A रुद्रटः
B चन्द्रशेखरः
C जैयटः
D अभिनवगुप्तः

24 अदोषौ’ इत्यत्र कस्मिन्नर्थे नञ् समासः?

A वह्वर्थे नञ्
B ईषदर्थे नञ्
C नास्ति इति अर्थे नञ्
D अस्ति इति अर्थे नञ्

25 काव्यप्रकाशः कीदृशः ग्रन्थः?

A काव्यग्रन्थः
B नाट्यग्रन्थः
C अलङ्कारग्रन्थः
D प्रकाशग्रन्थः

26 मङ्गलाचरणं कति विधम्?

A चतुर्विधम्
B द्विविधम्
C पञ्चविधम्
D त्रिविधम्

27 किमर्थम् इष्टदेवता ग्रन्थारम्भे परामृष्टा ?

A ग्रन्थविघ्नविघाताय
B ग्रन्थानन्दप्राप्तये
C धनप्राप्तये
D विजयप्राप्तये

28 नियतिशब्दस्य कोऽर्थः?

A ईश्वरेण कृतो विधिः B नियमस्य परिपालनम्

C नियमभङ्गः D नियमः

29 नवरसरुचिरा का?

A सरस्वती B लक्ष्मी

C पूर्णिमा रात्री D कविभारती

30 नियति शब्दस्य का व्युत्पत्तिः?

A नि + धी + क्तिन् B नी + यम् + क्तिन्

C नि + यम् + सून् D नि + यम् + क्तिन्

31 लोके कति रसाः वर्त्तन्ते ?

A एकादश B दश

C षड् D पञ्च

32 नाट्ये कति रसाः सन्ति?

A नव B दश

C एकादश D षड्

33 काव्यप्रकाशस्य रचयिता कः?

A भामहः B आनन्दवर्द्धनः

C विश्वनाथः D मम्मटः

34 ग्रन्थारम्भे ग्रन्थकृत् कां परामृशति ?

A सरस्वतीम् B कविभारतीम्

C जयाम् D लक्ष्मीम्

35 काव्यप्रकाशस्य प्रथमोल्लासस्य किं नाम?

A काव्यस्वरूपनिर्णयः B शब्दस्वरूपनिर्णयः

C दोषस्वरूपनिर्णयः D व्यञ्जनास्वरूपनिर्णयः

36 जयत्यर्थेन किम् आक्षिप्यते?

A जयघोषः B निर्वाणः

C नमस्कारः D धर्मः

37 काव्यस्य कति प्रयोजनानि?

A षट् B नव

C दश D पञ्च

38 श्रीहर्षः कस्मै धनमदात्?

A मम्मटाय B अभिनवगुप्ताय

C धावककवये D कालिदासाय

39 मयूरः किं विलिख्य कुष्ठरोगान्मुक्तो जातः?

A मयूरीशतकम् B मयूरशतकम्

C गान्धीशतकम् D गङ्गाशतकम्

40 गता प्राया रात्रिरित्यादिश्लोकः कस्य नाम्ना भणितः?

A कालिदासस्य B मम्मटस्य

C मयूरभट्टस्य D वाणभट्टस्य

41 मम्मटस्य कालः कः?

A षष्ठशतकम् B अष्टमशतकम्

C एकादशशतकम् D प्रथमशतकम्

42 काव्यप्रकाशस्य बालबोधिनीटीकाकारः कः?

A आनन्दभिक्षुः B अभिनवगुप्तः

C कल्लटः D वामनः

43 कवित्ववीजरूपसंस्कारविशेषः कः ?

A शक्तिः B लक्षणा

C अभिधा D संस्कारः

44 काव्यप्रकाशे कति उल्लासाः सन्ति?

A 9 B 10

C 8 D 12

45 मम्मटानुसारं काव्यस्य कति भेदाः सन्ति?

A चत्वारः B षट्

C पञ्च D त्रयः

46 ‘इति हेतुस्तदुद्भवे’ इत्यत्र ‘तद्’ शव्दस्य कोऽर्थः?

A काव्यम्  B अक्षरम्

C धनम्  D ध्वनिः

47 सर्वत्र सालङ्कारौ, क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः’ इति पंक्तिः किं पदमुद्दिश्य वर्त्तते?

A शब्दार्थौ  B निपुणता

C क्वापि  D अदोषौ

48 मम्मटः स्वजनुषा कं देशमलञ्चकार?

A महाराष्ट्रः  B काश्मीरः

C ओडिशा  D कर्णाटकः

49 इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः’ इति कस्य लक्षणम्?

A मध्यमकाव्यस्य  B अधमकाव्यस्य

C गुणीभूतव्यङ्ग्यकाव्यस्य  D ध्वनिकाव्यस्य

50 निःशेषच्युतचन्दनं स्तनतटम्’ इत्यस्मिन् पद्ये तदन्तिकमेव रन्तुं गताऽसीत् प्राधान्येन केन पदेन व्यज्यते?

A अधर  B मिथ्यावादिनि

C अधम  D तनुः

51 स्वच्छन्दोच्छलदच्छकच्छकुहर’ इति पद्यं कस्य उदाहरणम्?

A अर्थचित्रस्य  B शब्दचित्रस्य

C उत्तमकाव्यस्य  D मध्यमकाव्यस्य

52 चित्रकाव्यं कति विधम्?

A द्विविधम्  B त्रिविधम्

C चतुर्विधम्    D पञ्चविधम्

53 हरोवरः’ इत्यत्र कः अलङ्कारः?

A उपमा    B अर्थान्तरन्यासः

C अनुप्रासः    D प्रेयः

54 का नियतिशक्त्या नियतरूपा?

A कविसृष्टिः    B ब्रह्मसृष्टिः

C कालिदाससृष्टिः    D मम्मटसृष्टिः

55 बुधाः के?

A वैय्याकरणाः    B साहित्यकाः

C वैदिकाः    D मीमांसकाः

56 यशः केषामिव?

A धावकादीनामिव    B मयुरादीनामिव

C रामादीनामिव    D कालिदासादीनामिव

57 सुहृत्सम्मितं शास्त्रं किम्?

A वेदः    B पुराणम्

C साहित्यम्    D व्याकरणम्

58 लोकोत्तरवर्णनानिपुणकविकर्म किम्?

A वेदः    B व्याकरणम्

C काव्यम्    D पुराणम्

59 मध्यमकाव्यस्य अपरं नाम किम्?

A गुणीभूतव्यङ्ग्यकाव्यम्    B चित्रकाव्यम्

C ध्वनिकाव्यम्    D उत्तमकाव्यम्

60 काव्यज्ञशिक्षयाऽभ्यास’ इति कस्मिन् प्रसङ्गे वर्तते?

A काव्यप्रयोजन    B काव्यलक्षण

C काव्यभेद    D काव्यहेतु

61 प्रतीयमानार्थस्य ज्ञानं कैः स्वीक्रियते ?

A वैयाकरणैः    B वुधैः

C काव्यार्थतत्वज्ञैः D विद्वद्भिः

62 ध्वन्यालोके कति उद्योताः सन्ति?

A चत्वारः B त्रयः

C सप्त D पञ्च

63 अनुरागवती सन्ध्या' इत्यस्मिन् पद्ये कस्य प्राधान्यम्?

A वाच्यस्य B व्यङ्ग्यस्य

C वाच्यव्यङ्ग्ययोः D अलङ्कारस्य

64 उपसर्जनशब्दस्य कोऽर्थः?

A प्रतीयमानः B गुणीभूतः

C व्यञ्जकः D वाचकः

65 कस्य नखाः प्रपन्नार्तिच्छेदनं कुर्वन्ति?

A शिवस्य B विनायकस्य

C कार्त्तिकेयस्य D मधुरिपोः

66 शब्दगतचारुत्वहेतवः के प्रसिद्धाः?

A अनुप्रासादयः B उपमादयः

C अर्थान्तरन्यासादयः D रूपकादयः

67 नास्त्येव ध्वनिः' इति केषां मतम्?

A भाक्तवादीनाम् B ध्वनिवादीनाम्

C अभाववादीनाम् D मीमांसकानाम्

68 अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं किमिति आहुः ?

A भाक्तमिति B गुणवृत्तिः

C व्यञ्जना D रस

69 आनन्दवर्द्धनः कुत्र जन्म लब्धवान्?

A आन्ध्रप्रदेशे B वङ्गप्रदेशे

C काश्मीरे D कर्णाटके

70 वाच्यप्रतीयमानाख्यौ कस्य भेदौ?

A रसस्य
B सङ्केतितार्थस्य
C व्यङ्ग्यार्थस्य
D ध्वनेः

71 उपमादिभिः प्रकारैः कः प्रसिद्धः?

A वाच्यः
B व्यङ्ग्यः
C तात्पर्यार्थः
D ध्वनिः

72 महाकवीनां वाणीषु कः अर्थः तिष्ठति?

A वाच्यार्थः
B व्यङ्ग्यार्थः
C प्रतीयमानार्थः
D लक्ष्यार्थः

73 अङ्गनासु लावण्यमिव काव्ये कस्य स्थानम्?

A प्रतीयमानार्थस्य
B वाच्यार्थस्य
C अलङ्कारस्य
D रसस्य

74 भम धम्मिअ वीसत्थो' इति पद्यं कस्य उदाहरणम्?

A वाच्ये प्रतिषेधरूपे विधिरूपस्य
B वाच्ये विधिरूपे प्रतिषेधरूपस्य
C वाच्ये प्रतिषेधरूपे प्रतिषेधरूपस्य
D वाच्ये विधिरूपे विधिरूपस्य

75 अत्ता एत्थ णिमज्जइ एत्थ' अस्मिन् पद्ये अत्ताशब्दस्य कोऽर्थः ?

A माता
B सखी
C भगिनी
D श्वश्रूः

76 कस्य शोकः श्लोकत्वमागतः?

A वाल्मीकेः
B आनन्दवर्द्धनस्य
C श्रीरामस्य
D माघस्य

77 काव्यस्यात्मा कः अर्थः?

A वाच्यार्थः
B प्रतीयमानार्थः
C तात्पर्यार्थः
D सुखवोधार्थः

78 करुणरसस्य स्थायिभावः कः?

A भयम् B जुगुप्सा

C शोकः D वीरः

79 अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा किमिति गण्यन्ते?

A पण्डिताः B कवयः

C वुधाः D महाकवयः

80 ध्वन्यालोकस्य लोचनटीकायाः कर्त्ता कः ?

A आनन्दवर्द्धनः B भामहः

C अभिनवगुप्तः D यशोवर्द्धनः

81 ध्वन्यालोके मङ्गलाचरणे ग्रन्थकर्ता कं स्तौति?

A गणेशम् B कार्तिकेयम्

C शिवम् D नृसिंहम्

82 ध्वन्यालोकस्य कर्त्ता कः?

A मम्मटः B आनन्दवर्द्धनः

C महिमभट्टः D विश्वनाथः

83 अलङ्कारद्वयसम्भावनायां तु कयोः समप्राधान्यम्?

A गुणालङ्कारयोः B गुणवाच्ययोः

C वाच्यव्यङ्ग्ययोः D शब्दार्थयोः

84 सूरिभिः कथितः' इत्यत्र सूरिशब्दस्य कोऽर्थः?

A ध्वनिवादिभिः B रसवादिभिः

C सेवकैः D विद्वद्भिः

85 सर्वविद्यानां मूलं किम्?

A धर्मशास्त्रम् B काव्यशास्त्रम्

C व्याकरणं D अलङ्कारशास्त्रम्

86 ध्वनेः कतिधा व्युत्पत्तिः सम्भवति?

A चतुर्द्धा B त्रिधा

C पञ्चधा D दशधा

87 वैयाकरणाः श्रूयमाणेषु वर्णेषु किमिति व्यवहरन्ति?

A स्फोटः B कारकः

C रसः D ध्वनिः

88 अस्ति ध्वनिः। स च कतिविधः सामान्येन?

A द्विविधः B त्रिविधः

C चतुर्विधः D दशविधः

89 कृतविद्यशब्दस्य कोऽर्थः?

A धर्मपरायणः B दैवज्ञः

C साहित्यिकः D विद्वान्

90 शिखरिणि क्व नु नाम कियच्चिरं' इति पद्यं कस्य उदाहरणम्?

A अविवक्षितवाच्यस्य B प्रतीयमानार्थस्य

C विवक्षितान्यपरवाच्यस्य D वाच्यस्य

91 ध्वनिविरोधिषु कस्य ग्रहणं भवति?

A मम्मटस्य B मनोरथस्य

C अभिनवगुप्तस्य D आनन्दवर्द्धनस्य

92 काव्यस्यात्मा स एवार्थः' अत्र कस्य ग्रहणं भवति ?

A वाच्यार्थस्य B लक्ष्यार्थस्य

C सङ्केतितार्थस्य D प्रतीयमानार्थस्य

93 प्रथमे हि विद्वांसो के?

A वैदिकाः B वैयाकरणाः

C साहित्यिकाः D नैयायिकाः

94 ध्वन्यालोके प्रथमोद्योते कति कारिकाः सन्ति?

A 19 B 20

C 21 D 22

95 आनन्दवर्धनस्य उपाधिः कः ?

A विद्याभूषणः B वाचस्पतिः

C राजानकः D महामहोपाध्यायः

96 सुवर्णपुष्पां पृथिवीं के चिन्वन्ति ?

A पुरुषाः B स्त्रियः

C यक्षाः D पुरुषास्त्रयः

97 उपचारमात्रं तु किम्?

A ध्वनिः B भक्तिः

C काव्यम् D रसः

98 सहृदयमनःप्रीतिकारकः कः?

A ध्वनिः B काव्यम्

C नाटकम् D पद्यम्

99 अर्थगताश्चारुत्वहेतवो के प्रसिद्धाः?

A अनुप्रासादयः B माधुर्यादयः

C प्रसादादयः D उपमादयः

100 प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य हानिः इति केषां मतम् ?

A अभाववादीनाम् B भक्तिवादीनाम्

C अभिधावादीनाम् D ध्वनिवादीनाम्

ANSWER KEY

M.Phil – Sahityam

| *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY |
|---|---|---|---|---|---|---|---|
| 1 | B | 26 | D | 51 | B | 76 | A |
| 2 | C | 27 | A | 52 | A | 77 | B |
| 3 | C | 28 | A | 53 | C | 78 | C |
| 4 | D | 29 | D | 54 | B | 79 | D |
| 5 | B | 30 | D | 55 | A | 80 | C |
| 6 | D | 31 | C | 56 | D | 81 | D |
| 7 | D | 32 | A | 57 | B | 82 | B |
| 8 | B | 33 | D | 58 | C | 83 | C |
| 9 | D | 34 | B | 59 | A | 84 | D |
| 10 | D | 35 | A | 60 | D | 85 | C |
| 11 | C | 36 | C | 61 | C | 86 | C |
| 12 | B | 37 | A | 62 | A | 87 | D |
| 13 | A | 38 | C | 63 | A | 88 | A |
| 14 | A | 39 | B | 64 | B | 89 | D |
| 15 | C | 40 | D | 65 | D | 90 | C |
| 16 | C | 41 | C | 66 | A | 91 | B |
| 17 | C | 42 | D | 67 | C | 92 | D |
| 18 | B | 43 | A | 68 | B | 93 | B |
| 19 | D | 44 | B | 69 | C | 94 | A |
| 20 | C | 45 | D | 70 | D | 95 | C |
| 21 | A | 46 | A | 71 | A | 96 | D |
| 22 | C | 47 | C | 72 | C | 97 | B |
| 23 | C | 48 | B | 73 | A | 98 | A |
| 24 | B | 49 | D | 74 | B | 99 | D |
| 25 | C | 50 | C | 75 | D | 100 | B |